CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ

शिवमहिम्नस्तोत्रं

वेदसारशिवस्तोत्रं च

प्रारभ्यते ।

इसका रजिष्टरी सब हक "श्रीवेङ्कटेश्वर" यन्त्रालयाध्यक्षने स्वाधीन रखा है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कैलासविहारिणे नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ पुष्पदन्त उवाच॥
महिम्नः पारंते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि
गिरः ॥ अथावाच्यः सर्वः स्वमतिपरि
णामावधि गृणन्ममाप्येषः स्तोत्रे हर
निरपवादः परिकरः॥१॥अतीतः पन्थां
नं तव च महिमा वाङ्मनसयोरतद्व्या
वृत्त्या यं चकितमभिधत्ते श्रुतिरपि॥स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कस्य स्तोतव्यः कतिविधगुणः कस्य
विषयः पदे त्वर्वाचीने पतति न मनः
कस्य न वचः ॥२॥ मधुस्फीता वाचः
परमममृतं निर्मितवतस्तव ब्रह्मन्किंवा
गपि सुरगरोर्विस्मयपदम् ॥ मम त्वेतां
वाणीं गुणकथनपुण्येन भवतः पुनामी
त्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता ॥
॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रलयकृत्त्रयीवस्तुव्यस्तं तिसृषु गुण
भिन्नासु तनुषु ॥ अभव्यानामस्मिन्व
रदरमणीयामरमणीं विहन्तुं व्याक्रोशीं
विदधत इहैके जडधियः ॥४॥ किमीहः
किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान
इति च ॥ अतर्क्यैश्वर्ये त्वय्यनवसर
दुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रयति मोहाय जगतः॥५॥ अजन्मानो
लोकाः किमवयववन्तोऽपि जगतामधि
ष्ठातारं किं भवविधिरनादृत्य भवति ॥
अनीशो वा कुर्याद्भुवनजनने कः परि
करो यतो मन्दास्त्वां प्रत्यमरवर संशे
रत इमे॥६॥त्रयी सांख्यं योगः पशुपति
मतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिद
मदः पथ्यमिति च॥रुचीनां वैचित्र्यादृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जुकुटिलनानापथजुषां नृणामेको गम्य
स्त्वमसि पयसामर्णव इव॥७॥महाक्षः
खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम्॥
सुरास्तां तामृद्धिं दधति तु भवद्भ्रू
प्रणिहितां न हि स्वात्मारामं विषयमृग
तृष्णा भ्रमयति ॥ ८॥ ध्रुवं कश्चित्सर्वं
सकलमपरस्त्वद्ध्रुवमिदं परो ध्रौव्याध्रौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्ये जगति गदति व्यस्तविषये॥समस्ते ऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तु वाञ्चिह्नेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः परिच्छेत्तुं यातावनलमन लस्कंधवपुषः ॥ ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥ अय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशा
न्॥ शिरःपद्मश्रेणीरचितचरणाम्भोरुह
बलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फू
र्जितमिदम् ॥ ११ ॥ अमुष्य त्वत्सेवा
समधिगतसारं भुजवनंबलात्कैलासेऽपि
त्वदधिवसतौ विक्रमयतः ॥ अल
भ्यापातालेऽप्यलसचलिताङ्गुष्ठशिरसि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति
खलः ॥१२॥ यद्दृद्धिं सुत्राम्णो वरद
परमोच्चैरपि सतीमधश्चक्रे बाणः
परिजनविधेयत्रिभुवनः ॥ न तच्चित्रं
तस्मिन् वरिवसितरि त्वच्चरणयोर्न
कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवन
तिः ॥ १३ ॥ अकाण्डब्रह्माण्डक्षयचकि
तदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न विषं संहृतवतः ॥ स कल्माषः कण्ठे
तव न कुरुते न श्रियमहो विकारोऽपि
श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥
असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य
विशिखाः ॥ स पश्यन्नीश त्वामि
तरसुरसाधारणमभूत् स्मरः स्मर्तव्या
त्मा नहि वशिषु पथ्यः परिभवः ॥१५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मही पादाघाताद्व्रजति सहसा संशय पदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रह गणम् ॥ मुहुर्द्यौर्दौस्थ्यं यात्यनिभृत जटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ॥ जग द्द्वीपाकारं जलधिवलयं तेन कृतमित्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नैनैवोन्नेयं धृतमहिमादिव्यं तव वपुः ॥
।१७।रथः क्षोणी यन्ता शतधृतिरगेन्द्रो
धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः
शर इति ॥ दिधक्षोस्ते कोऽयं त्रिपुर
तृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न
खलु परतन्त्राः प्रभुधियः ॥ १८॥ हरि
स्ते साहस्रं कमलबलिमाधाय पदयो
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म् ॥ गतो भक्त्युद्रेकः परिणतिमसौ
चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जाग
र्ति जगताम् ॥१९॥ क्रतौ सुप्ते जाग्रत्त्व
मसि फलयोगे क्रतुमतां क्व कर्म प्रध्व
स्तं फलति पुरुषाराधनमृते ॥ अतस्त्वां
संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ
श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥
॥२०॥ क्रियादक्षो दक्षः क्रतुपतिरधीश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तनुभृतामृषीणामार्त्विज्यं शरणद
सदस्याः सुरगणाः ॥ क्रतुभ्रंशस्त्वत्तः
क्रतुषु फलादानव्यसनिनो ध्रुवं कर्तुः
श्रद्धाविधुरमभिचारायहि मखाः॥२१॥
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहि
तरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य
वपुषा॥ धनुष्पाणेर्यातं दिवमपि सपत्रा
कृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृग

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याधरभसः ॥ २२ ॥ स्वलावण्याशंसा
धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा
पुरमथन पुष्पायुधमपि॥यदि स्त्रैणं देवी
यमनिरतदेहार्धघटनादवैति त्वामद्धा
बत वरद मुग्धा युवतयः ॥२३॥ श्मशा
नेष्वाक्रीडा स्मरहर पिशाचाः सहचरा
श्चिताभस्मालेपः स्रगपि नृकरोटी परि
करः ॥ अमङ्गल्यं शीलं तव भवतु नामै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वमखिलं तथापि स्मर्तॄणां वरद परमं
मङ्गलमसि ॥२४॥ मनः प्रत्यक्चित्ते स
विधमवधायात्तमरुतः प्रहृष्यद्रोमाणः
प्रमदसलिलोत्सङ्गितदृशः ॥ यदालो
क्याह्लादं हृद इव निमज्यामृतमये दध
त्यन्तस्तत्त्वं किमपि यमिनस्तत्किल
भवान्॥२५॥त्वमर्कस्त्वं सोमस्त्वमसि
पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमु धरणिरात्मा त्वमिति च॥पारिच्छि
न्नामेवं त्वयि परिणता बिभ्रति गिरं न
विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि
॥ २६ ॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवन
मथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभि
रभिदधत्तीर्णविकृति ॥ तुरीयं ते धामध्व
निभिरवरुन्धानमणुभिः समस्तं व्यस्तं
त्वां शरणद गृणात्योमितिपदम् ॥२७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवश्शर्वो रुद्रः पशुपतिरथोग्रः सहमहां
स्तथा भीमेशानाविति यदभिधानाष्ट
कमिदम् ॥ अमुष्मिन्प्रत्येकं प्रविचरति

---

१ एतस्माच्छ्लोकात्पूर्वं--स्कान्दपुराणीयशिवरहस्यग्रन्थे--पुष्पदन्तकृतेऽस्मिन्नेव शिवमहिम्नस्तोत्रे--श्लोकद्वयमधिकमुपलब्धमस्ति, तदत्र प्रदर्श्यते--

"सतां वर्त्म त्यक्त्वा श्रुतिसमधिगम्यं सहभुवं
घृणामप्युन्मूल्य स्वजनविषयस्नेहगुणिताम् ।
द्विजः कृन्तन्पादे पितरमथ राद्धे त्वयि विभो
मनुष्यत्वं सद्यस्त्रिदशपरिणामेन विजहौ ॥ १ ॥
वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न क्वापि क्षणमपि भवन्तं प्रणतवान् ।
नमन्मुक्तः संप्रत्यहमतमुगर्वादगातिमा-
नितीश क्षन्तव्यं तादिदमपराधद्वयमपि ॥ २ ॥" इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महि. १०

देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहि
त नमस्योऽस्मि भवते ॥२८॥नमो नेदि
ष्ठाय प्रियदवदविष्ठाय च नमो नमः
क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ॥
नमो वर्षिष्ठाय त्रिनयन यविष्ठा च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च
नमः ॥ २९ ॥ बहुलरजसे विश्वोत्पत्तौ
भवाय नमोनमः प्रबलतमसे तत्संहारे

स्तो. १०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हराय नमो नमः॥ जनसुखकृते सत्त्वो
द्रिक्तौ मृडाय नमोनमः प्रमहसि पदेनि
स्त्रैगुण्ये शिवाय नमोनमः ॥३०॥कृश
परिणति चेतः क्लेशवश्यं क्वचेदं क्वचतव
गुणसीमोल्लङ्घिनी शश्वदृद्धिः ॥ इति
चकितममन्दीकृत्य मां भक्तिराधाद्धरद
चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥
असितगिरिसमं स्यात्कज्जलं सिंधु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति॥
॥३२॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौ
लेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो रु
चिरमलघुवृत्तैः स्तोत्रमेतच्चकार।३३।
अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परमभक्त्या शुद्धचित्तः पुमान्यः ॥ स
भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुर
तरधनायुःपुत्रवान्कीर्तिमांश्च॥३४॥महे
शान्नापरो देवो महिम्नो नापरा स्तुतिः ॥
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः
परम्॥ ३५॥ दीक्षा दानं तपस्तीर्थं होम
यागादिकाः क्रियाः ॥ महिम्नस्तव
पाठस्य कलां नार्हन्ति षोडशीम्॥३६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुसुमदशननामा सर्वगन्धर्वराजः शिशु
शशधरमौलेर्देवदेवस्य दासः ॥ स खलु
निजमहिम्नो भ्रष्ट एवास्य रोषात्स्तव
नमिदमकार्षीद्दिव्यदिव्यं महिम्नः
॥ ३७ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षै
कहेतुं पठति यदि मनुष्यः प्राञ्जलि
र्नान्यचेताः॥व्रजति शिवसमीपं किन्नरैः
स्तूयमानः स्तवनमिदममोघं पुष्प

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दन्तप्रणीतम्॥ ३८ ॥ श्रीपुष्पदन्तमुख पङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण॥ कण्ठास्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥ ३९ ॥ इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः ॥ अर्पिता तेन मे देवः प्रीयतां च सदाशिवः ॥ ४० ॥

इति श्रीपुष्पदन्तगन्धर्वराजविरचितं श्रीशिवमहिम्नस्तोत्रं संपूर्णम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः॥अथ वेदसारशिवस्तो
त्रप्रारम्भः।पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्॥ जटा
जूटमध्येस्फुरद्गाङ्गवारिं महादेवमेकं स्म
रामि स्मरारिम्॥१॥महेशं सुरेशं सुराराति
नाशं विभुं विश्वनाथं विभूत्यङ्गभूषम्।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं सदानन्द
मीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥ गिरीशं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गणेशं गले नीलवर्णं गजेन्द्राधिरूढं
गुणातीतरूपम् ॥ भवं भास्वरं भस्मना
भषिताङ्गं भवानीकलत्रं भजे पञ्च
वक्त्रम्॥३॥शिवाकान्त शम्भो शशाङ्का
र्धमौले महेशान शूलिञ्जटाजूटधारिन् ॥
त्वमेको जगद्व्यापको विश्वरूप प्रसीद
प्रसीद प्रभो पूर्णरूप॥४॥परात्मानमेकं
जगद्बीजमाद्यं निरीहं निराकारमोंका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रवेद्यम् ॥ यतो जायतेपाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥
न भूमिर्न चापो न वह्निर्न वायुर्न चाका
शमास्ते न तन्द्रा न निद्रा ॥ न ग्रीष्मो
न शीतं न देशो न वेषो न यस्यास्ति
मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥ अजं
शाश्वतं कारणं कारणानां शिवं केवलं
भासकंभासकानाम्॥तुरीयंतमःपारमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्यन्तहीनं प्रपद्ये पर पावन द्वैतहीनम्
॥ ७ ॥ नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ॥ नमस्ते
नमस्ते तपोयोगगम्य नमस्ते नमस्ते
श्रुतिज्ञानगम्य ॥ ८ ॥ प्रभो शूलपाणे
विभो विश्वनाथ महादेव शम्भो महेश
त्रिनेत्र॥शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ९ ॥ शम्भो महेश करुणामय
शूलपाणे गौरीपते पशुपते पशुपाश
नाशिन् ॥ काशीपते करुणया जगदेक
देवस्त्वं हंसि पाशि विदधासि महेश्वरो
ऽसि ॥१०॥ त्वत्तो जगद्भवति देव भव
स्मरारे त्वय्येव तिष्ठति जगन्मृड विश्व
नाथ ॥ त्वय्येव गच्छति लयं जगदेत
दीशलिङ्गात्मके हरचराचरविश्वरूपिन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ११ ॥ इति श्रीमच्छङ्कराचार्यवि
रचितं वेदसारशिवस्तोत्रं सम्पूर्णम् ।

श्रीमच्छङ्करार्पणमस्तु ।

मुद्रक और प्रकाशक–
खेमराज श्रीकृष्णदास,
मालिक–"श्रीवेङ्कटेश्वर" स्टीम्–प्रेस–बम्बई.
सं० १९८५, शकः १८५०.

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,
बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्–प्रेस,
कल्याण–बम्बई.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति

शिवमहिम्नस्तोत्रं

वेदसार शिवस्तोत्रं च

समाप्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीः ।

भूतशुद्धि प्राणप्रतिष्ठा व कात्यायन सूत्रोक्त

त्रिकाल संध्या प्रयोगः

जिसको

सहस्र अवदीच्य ज्ञाति गौतमगोत्रस्य गौतमाङ्गिरस

औतिथ्येति त्रिप्रवरस्य शुक्लयजुर्वेदस्य

माध्यन्दिन शाखाध्यायी द्विवेदी

नाथूरामात्मज

धनलाल शर्मा ने

मुंबई वैभव प्रेस में छपाकर प्रकाशित किया.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिकाल संध्या प्रयोगः ।

श्रीगणेशायनमः ॥

यथोक्तस्नानानन्तरं श्वेतं धौतं वस्त्रं परिधा-
योपवस्त्रं गृहीत्वानन्तरं कुशासने स्वस्तिकादौ
आसनविधिना प्राङ्मुख उपविश्य पश्चात् संध्यो-
पासनमारभेत् ॥ अथभस्मधारणं । ॐ त्र्यायुषञ्ज
मदग्नेः कश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषंतन्नो-
ऽस्तुत्र्या युषम् ॥ गायत्रीमंत्रेण शिखाबंधनं ॥
ॐ नमः शिवायेति मंत्रेण कंठेरुद्राक्षमालाधारणं ॥
स्वदक्षिणहस्त अनामिकायां कुशपवित्रधारणं ॥
दिग्बंधनं । अपसर्पंतु ये भूता ये भूताभूमि
संस्थिताः ॥ ये भूता विघ्नकर्त्तारस्तेनश्यंतुशिवा-
ज्ञया ॥ १ ॥ अपक्रामंतु भूतानि पिशाचाः सर्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तोदिशः । सर्वेषामविरोधेन ब्रह्मकर्म समारभेत् ॥ २ ॥ ॐ आधारशक्तिकमलासनाय नमः इत्यासनं सम्पूज्य ॥ तत्र प्राङ्मुख उदङ्मुखोवासिद्धासने समुपविश्य । तत्रासनप्रकारः । पृथ्वीत्यस्य मंत्रस्य मेरुपृष्ठऋषिः कूर्मो देवता सुतलं छंदः आसने विनियोगः । ॐ पृथ्वि त्वया धृतालोका देवि त्वं विष्णुनाधृता ॥ त्वं च धारय मां देवि पवित्रं कुरुचासनं ॥ १ ॥ ॐ भूतशुद्धिं विनाकर्म क्रियते यज्जपादिकम् ॥ तत्सर्वं निष्फलं यस्मात्तस्मात्तां पूर्वमाचरेत् ॥ आचमनं । ॐ अच्युतायनमः । ॐ अनन्तायनमः । ॐ गोविन्दायनमः । इति त्र्याचम्य । हस्तप्रक्षालनं । प्राणायामं । प्रणवस्यपरब्रह्मऋषिः परमात्मादेवता गायत्रीछंदः प्राणायामे विनियोगः । ॐ नमोभगवते वासुदेवाय, इति आत्मनः परितः उदकं प्रक्षिप्य प्राणायामं चरेत् । वामेनपूरकं ॐ ४ मध्येकुम्भकं ॐ १६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दक्षिणेरेचकं ॐ ८ इतिप्राणायामम् ॥ संकल्पः ॥ मासानां मासोत्तममासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुक वासरे ममपूजनजपादेः सफलत्वसिध्यर्थं आदौ भूतशुद्धिं प्राणप्रतिष्ठां च करिष्ये ॥

अथ भूतशुद्धिः ॥

ॐ पादादिजानुपर्यंतं पृथ्वीस्थानं तच्चतुरस्रं पीतवर्णं वज्रलांछितं ब्रह्मदैवतं ल मिति बीजयुक्तं ध्यायेत् ॥ ततो जान्वादिनाभिपर्यन्तं अपांस्थानं तच्चार्द्धचन्द्राकारं शुक्लवर्णं पद्मलांछितं विष्णुदैवतं वमिति बीजयुक्तं ध्यायेत् ॥ नाभ्यादिकंठपर्यंतं अग्निस्थानं तच्च त्रिकोणाकारं रक्तवर्णं स्वस्तिकलांछितं रुद्रदैवतं र मिति बीजयुक्तं ध्यायेत् ॥ कंठादिभ्रूपर्यंतं वायुस्थानं षट्कोणाकारं षड्बिन्दुलांछितं कृष्णवर्णं ईश्वरदैवतं य मिति बीजयुक्तं ध्यायेत् ॥ भ्रूमध्यादि ब्रह्मरंध्रपर्यंतं आकाशस्थानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदाशिवदैवतं ह
मिति बीजयुक्तं ध्यायेत् ॥ एवं स्वशरीरे पंच-
महाभूतानि ध्यात्वा प्रविलापनं कुर्यात् ॥ पृथिवी
मप्सु अपोऽग्नौ अग्निं वायौ वायुमाकाशे आकाशं
तन्मात्रा हंकार महदात्मिकायां मातृकासंज्ञकश-
ब्दब्रह्मस्वरूपायां त्द्दल्लेखार्थभूतायां प्रकृतिमा-
यायां प्रविलापयामि । तथाविधां मायां च
नित्यशुद्धबुद्धमुक्तस्वभावे स्वात्मप्रकाशरूपे सत्य-
ज्ञानानंतानंदलक्षणे परमकारणे परमार्थभूते परब्र-
ह्मणि प्रविलापयामि ॥ समस्तदेहादिप्रपञ्चं ब्रह्मणि
प्रविलाप्य तच्च नित्यशुद्धबुद्धमुक्तस्वभावं सच्चि-
दानन्द स्वरूपं परिपूर्णं ब्रह्मैवाहमस्मीति भावयेत् ।
एवं ध्यात्वा यथोक्तस्वरूपात् प्रणवात्मकात् पर-
ब्रह्मणः सकाशात् हृल्लेखार्थभूता सर्वमंत्रमयी
मातृका संज्ञकशब्दब्रह्मात्मिका महदहंकारादि
पंचतन्मात्रादि समस्त प्रपंचकारणभूता प्रकृति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपा माया रज्जुसर्पवत् विवर्तरूपेण प्रादुर्भूता इति ध्यात्वा तस्या मायायाः सकाशात् यथोक्त-माकाशमुत्पन्नं आकाशाद्वायुरुत्पन्नः वायोरग्नि-रग्नेरापः अद्भ्यः पृथिवी समजायत ॥ इति ध्यात्वा तेभ्यः पंचमहाभूतेभ्यः सकाशात् स्वशरीरं तेजो-मयं पुण्यात्मकं पुरुषार्थसाधन देवताराधनयोग्य-मुत्पन्नमिति ध्यात्वा ॥ तस्मिन् शरीरे सर्वात्मकं सर्वज्ञं सर्वशक्तिसमन्वितं समस्तदेवतामयं सच्चि-दानन्दस्वरूपं परिपूर्णं ब्रह्मात्मरूपेणानुप्रविष्टमिति भावयेत् ॥ एषा भावना मुख्या । इति भूतशुद्धिः ॥

॥ अथ प्राण प्रतिष्ठा प्रयोगः ॥

ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामाथर्वाणछन्दांसि चैतन्यरूपा सकल जगत्सृष्टिकारिणी प्राणशक्तिर्देवता आँ बीजं ह्रीं शक्तिः क्रों कीलकं मम धर्मार्थ काम मोक्षार्थे प्राणप्रतिष्ठापने विनियोगः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अथ ऋष्यादिन्यासः)

ब्रह्मविष्णुरुद्रऋषिभ्योनमः शिरसि ॥ ऋग्यजुः सामाथर्वाणश्छन्दोभ्यो नमः मुखे । चैतन्यरूपा सकल जगत्सृष्टिकारिणी प्राणशक्तिर्देवतायै नमो हृदये । आँ बीजाय नमो गुह्ये । ह्रीं शक्तये नमः पादयोः । क्रों कीलकाय नमः नाभौ ॥

(अथ करन्यासः)

ॐ अं कं खं गं घं ङं आकाशवायु वह्नि जल-भूम्यात्मने आं अंगुष्ठाभ्यांनमः ॥ ॐ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यांनमः॥ ॐ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा-त्मने ॐ मध्यमाभ्यांनमः । ॐ एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः ॥ ॐ ओं पं फं बं भं मं वचनादानगति विसर्गानंदात्मने औं कनिष्ठिकाभ्यांनमः ॥ ॐ अं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यं रं लं वं शं षं सं हं ळं क्षं बुद्धिमनोहंकारचित्त-विज्ञानात्मने अःकरतलकरपृष्ठाभ्यांनमः ॥

(अथहृदयादिन्यासः)

ॐ अं कं खं गं घं ङं आकाशवायुवह्निजल-भूम्यात्मने आं हृदयायनमः ॥ ॐ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं शिरसेस्वाहा ॥ ॐ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा-त्मने ॐ शिखायैवषट् ॥

ॐ एं तं थं दं धं नं वाक्पाणिपादपायूपस्था-त्मने ऐं कवचायहुं ॥ ॐ ओं पं फं बं भं मं वच-नादानगतिविसर्गानंदात्मने औं नेत्रत्रयायवौ-षट् ॥ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं बुद्धि मनोहंकार चित्त विज्ञानात्मने अः अस्त्रायफट् ॥ ततो नाभितः पादपर्यंतं आंनमः। हृदयतो नाभि-पर्यंतं ह्रीं नमः। मूर्द्धादि हृदयपर्यंतं क्रोंनमः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततोहृदय कमले न्यसेत् ॥ यं त्वगात्मने नमः वायुकोणे । रंरक्तात्मने नमः अग्नि कोणे । लंमांसात्मने नमः पूर्वे । वं मेदात्मने नमः पश्चिमे । शं अस्थ्यात्मने नमः ईशाने । षं मज्जात्मने नमः नैर्ऋत्यकोणे । संशुक्रात्मने नमः उत्तरे । हं प्राणात्मने नमः दक्षिणे । सः जीवात्मने नमः मध्ये हृत्कमलेन्यसेत् । अथ ध्यानम् ॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः । पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पंच बाणान् ॥ विभ्राणा सृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या । देवी बालार्कवर्णा भवतु शुभकरी प्राणशक्तिः परानः ॥ १ ॥ ततो हृदि हस्तं निधाय मंत्रं जपेत् । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हं सः सोहं मम प्राणाइह प्राणाः ॥ ॐ आंह्रीं क्रों यं रं लं वं शंषंसं हं हं सः सोहं मम जीव इहस्थितः ॥ ॐ आंह्रीं क्रों यं रं लं वं शं षंसंहं हं सः सोहं ममसर्वे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्द्रियाणि इह ॥ ॐ आंह्रींक्रों यं रं लं वं शं षं सं हं हंसः सोहं ममवाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राण प्राण इहागत्य सुखं चिरं तिष्ठन्तुस्वाहा । ॐ हंसः सोऽहं स्वाहा ॥ इतिप्राण प्रतिष्ठा समाप्ताः ।

अथ कात्यायनसूत्रोक्त सन्ध्या प्रयोगः ।

सङ्कल्प—अद्य पूर्वोच्चरित एवं ग्रहगुण विशेषण विशिष्टायां शुभपुण्यतिथौ मासानां मासोत्तममासे ममोपात्तदुरितक्षयार्थं ब्रह्मलोकावाप्त्यै प्रातःसन्ध्योपासनमहंकरिष्ये । ओं केशवायनमः । १ ओं नारायणायनमः । ॐ माधवायनमः । ॐ गोविन्दायनमः इति त्रिराचम्य । प्रणवस्य परब्रह्मऋषिः परमात्मादेवता गायत्रीछंदः प्राणायामे विनियोगः । उँभूः उँभुवः उँस्वः उँमहः उँजनः उँतपः उँसत्यम् उँतत्सवितु० त् ॐ आपो ज्योतिरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ॥ वामेनपूरकं १ मध्ये कुंभकं ४ दक्षिणेरेचकं २ । इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राणायामं । सप्रणव व्याहृत्रित्रय गायत्री मंत्रेण त्रिवारं सूर्यायार्घ्यं दद्यात् ❀ अथ सूर्योपस्थानं । ॐउद्वयमिति हिरण्यरूपऋषिः अनुष्टुप्छंदःसूर्योदेवता उदुत्यमिति प्रस्कण्वऋषिः गायत्रीछन्दःसूर्योदेवता चित्रन्देवानामिति कुत्साङ्गिरस ऋषिः त्रिष्टुप्छन्दः सूर्योदेवता तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः उष्णिक्छन्दः सूर्योदेवता चतुर्णामपि सूर्योपस्थाने विनियोगः । ॐ उद्वयन्तमं सस्परिस्वः पश्यन्तऽउत्तरम् । देवन्देवत्रा सूर्य्यमगन्मज्ज्योतिरुत्तमम् ॥ १ ॥ उदुत्यञ्जातवेदसन्देवव्वहन्तिकेतवः ॥ दृशेव्विश्वायसूर्य्यम् ॥ २ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः आप्राद्यावापृथिवीऽअन्तरिक्षꣳ सूर्य्यऽआत्मा जगतस्तस्थु-

* प्रातः सूर्याभिमुखं गंधाक्षतपुष्पयुक्तानि त्रीण्यर्घ्याणि दद्यात् । दत्तार्घ्योदकेन दक्षिणमुखनासा चक्षुः श्रोत्रस्पर्शनं कुर्यात् । कालातिक्रमेसति चतुर्थं प्रायश्चित्तार्घ्यं देयं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षश्च ॥ ३ ॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदः शतञ्जीवेमशरदः शतꣳश्रृणुयामशरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ ४ ॥

इति उपस्थानम् ।

जपसंकल्पः । मम सकलपापक्षयार्थं अष्टोत्तरशत गायत्रीजपमहं करिष्ये । जप मंत्रः । ॐ भूर्भुवः स्वः ॐतत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियो-योनः प्रचोदयात् ॐ १०८ मयाकृतेन अष्टोत्तर शतसंख्याकगायत्रीमंत्रजपेन श्रीभगवान्ब्रह्मस्व-रूपी सवितादेवता प्रीयतां नमम । उत्तर संकल्पः । अनेन प्रातः सन्ध्योपासनाख्येन श्रीभगवान्

व्यासः—संध्यात्रये प्येक मेव उपस्थानं प्रचक्षते । उद्वयं उदुत्यं चित्रं तच्चक्षु स्तिष्ठदिवकरम् ।

गायत्री जप १०८ वा २८ वा १० तो नित्य जाप कर फिर भोजन करे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मस्वरूपी सविता देवता प्रीयतां नममः ।
(उत्तर-संकल्पः-।-अनेन प्रातः सन्ध्योपासनाख्येन
श्रीभगवान् ब्रह्मस्वरूपी सविता देवता प्रीयतां
नममः।

ॐ तत्सद्ब्रह्मार्पणमस्तु ।

इति संध्या प्रयोगः ।

(ब्राह्मणहितैषी कार्य्यालय)

यहांपर पूजा पाठ नित्यनीयम सम्बधि सर्व प्रकार का सामान मिलता है—पुस्तकें वर्तन आसन माला पादुका उपवीत इत्यादि—

प्रकाशक और मिलनेका

पत्ता—द्विवेदी नाथूरामात्मज धनलाल शर्मा.
ठि. रायजीकी ब्रह्मपुरी—चांदपोल उदयपुर-मेवाड.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri